ओं सत्गुरुभो नमः

**श्री सोमस्तोत्र महामन्त्रं**

अस्य श्री सोम स्तोत्र महामन्त्रस्य
गौतम ऋषिः अनुष्टुप् छन्दः
सोमदेवता सोमप्रीत्यर्त्थे जपे विनियोगः

वां अंगुष्टाभ्यां नमः
वीं तर्जनीभ्यां नमः
वूं मद्ध्यमाभ्यां नमः
वैं अनामिकाभ्यां नमः
वौं कनिष्टिकाभ्यां नमः
वः करतलकरपृष्टाभ्यां नमः
वां हृदयाय नमः
वीं शिरसे स्वाहा
वूं शिखायै वषट्
वैं कवचाय हूं
वौं नेत्रत्रयाय वौषट्
वः अस्त्रायफट्
भूर् भुवस्सुवरोमिति दिग्बन्धः

**ध्यानं**

श्वेतांबरो ऽ ज्ज्वलतनुं
सितमाल्यगन्धं
श्वेताश्व युक्तरथगं
सुरसेवितांघ्रीं
दोर्भ्यां दृता ऽ भयगतं
वरदं सुधांशुं
श्रीवत्समौक्तिकधरं
प्रणमामि चन्द्रं (1)

आग्नेयभागे सरतो दशश्वः
चात्रेयजो यामुन देशजश्च
प्रत्यंङ्मुखस्थः चतुरश्चपीठो
गदाधरो ऽवतु रोहिणीशः (2)

चन्द्रं नमामिवरदं
शङ्करस्य विभूषणं
कलानिधिं कान्तरूपं
केयूरमकुटोज्ज्वलं (3)

वरदं वन्द्यचरणं
वासुदेवस्य लोचनं
वसुधाहळादनकरं
विधुं तं प्रणमाम्यहं (4)

श्वेतमाल्यांबरधरं
श्वेतगन्धानुलेपनं
श्वेतच्छत्रोल्लसन्मौलिं
शशिनं प्रणमाम्यहं (5)

सर्व्वं जगज्जीवयसि
सुधारसमयैः करैः
सोम! देहिममारोग्यं
सुधापूरितमण्डलि (6)

राजात्वं ब्राह्मणानाञ्च
रमाया अपिसोदरः
राजानाथश्चौषधीनां
रक्षमां रजनीकरः (7)

शङ्करस्य शिरोरत्नं
शार्ङ्गिणस्य विलोचनं
तारकाणामधीशस्त्वं
तारयास्मान्‌ महापदः (8)

कल्याणमूर्त्ते वरदः
करुणारस वारिधे
कलशोदधिसञ्जात
कलानाथ कृपांकुरु (9)

क्षीरार्णव समुद्भूत
चिन्तामणि सहोत्भव
कामितार्त्थान् प्रदेहि त्वं
कल्पद्रुमसहोदर (10)

श्वेतांबर श्वेतविभूषणाढो
कलाधरः श्वेतरुचिर् द्विबाहुः
चन्द्रः सुधात्मा वरदः किरीटि
श्रेयांसिमह्यं प्रददातु देवः (11)

इदं निशाकरस्तोत्रं यः पठेद् प्रत्यहं नरः
स सर्व्वरोगनिर्मुक्तः शतायुस्सुखमेधतेः

**श्री सोमस्तोत्रं सन्पूर्णं**